# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| **कक्षा-शास्त्री-२** | **प्रश्नपत्रम् – ५** | **गुणाः – ७०** |
| **विषयः – पुराणेतिहासः** | **सत्रम्- ४ चतुर्थम्** | **समयः-११:३० तः ०२:३०** |
| **दिनाङ्कः – ३१/०३/२०२०** | **सन्दर्भग्रन्थः – श्रीमद्भागवतमहापुराणे स्कन्धः ६-७** | |

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्नः १ निम्नश्लोकेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत।** १०

१ कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः।
नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः।।

२ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः।
वेदो नारायणः साक्षात्स्वयम्भूरिति शुश्रुमः।।

३ सूर्योऽग्निः खं मरुद्गावः सोमः सन्ध्याहनी दिशः।
कं कुः कालो धर्म इति ह्येते दैह्यस्य साक्षिणः।।

**प्रश्नः २ निम्नयो एकस्मिन् विषये निबन्धं लिखत।** १०

१ भागवतधर्मः।

२ अजामिलोपाख्यानम्।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्नः ३ निम्नश्लोकेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत।** १०

१ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम्।
कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान्।।

२ तपो मे हृदयं ब्रह्मस्तनुर्विद्या क्रियाऽऽकृतिः।
अङ्गानि क्रतवो जाता धर्म आत्मासवः सुराः।।

३ न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम्।
न योगसिद्धीरपुनर्भवं वा समञ्जस त्वा विरहय्य काङ्क्षे।।

**प्रश्नः ४ निम्नविषययो एकस्मिन् विषये निबन्धं लिखत।** १०

१ चित्रकेतु- आख्यानम्।

२ इन्द्रवृत्रयोः युद्धम्।

## तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ निम्नश्लोकेषु द्वयोः ससन्दर्भव्याख्यां कुरुत।** १०

१ अशपन् कुपिता एवं युवां वासं न चार्हथः।
पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः।।

२ स तेपे मन्दरद्रोण्यां तपः परमदारुणम्।
ऊर्ध्वबाहुर्नभोदृष्टिः पादाङ्गुष्ठाश्रितावनिः।।

३ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्।
आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतम्।।

**प्रश्नः ६ निम्नयो एकस्मिन् विषये निबन्धं लिखत।** १०

१ प्रह्लादस्य भक्तिः।

२ त्रिपुरविजयवृत्तान्तम्।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ निम्नेषु केचन दशप्रश्ना साधनीयाः।** १०

१ भक्तिः कतिविधा?

२ हिरण्यकशिपुः कस्य भ्राता आसीत्?

३ प्रह्लादस्य दानवगुरू कौ आस्ताम्?

४ कयाधुः का आसीत्?

५ नारदः सदाचारज्ञानं कस्मै ददाति?

६ त्रिपुरदहनं केन कृतम्?

७ देवकार्ये कति ब्राह्मणान् भोजयेत्?

८ नारदाय केन श्रापः प्रदत्तः?

९ गरुडस्य माता का आसीत्?

१० प्रह्लादस्य कति भ्रातर आसन्?

११ प्रह्लादस्य भक्तिगुरुः कः आसीत्?

१२ पुरुषः कस्य समोऽस्ति?

१३ अधर्मस्य कति शाखाः सन्ति?

१४ प्रह्लादस्य रक्षायै भगवता किं स्वरूपं धृतम्?

१५ हिरण्यकशिपवे केन प्रदत्तं वरम्?

*************************